# শ্রীরামনাথ-সুপ্রভাতম্

{॥ শ্রীরামনাথ-সুপ্রভাতম্ ॥}

গণেশং শারদাং শংভুং দেবীং দুর্গাং চ রাঘবম্ ।
রামনাথং নমস্কৃত্য সুপ্রভাতং করোম্যহম্ ॥ ১॥

নমস্তে গিরিজা-কান্ত শরণাগত-বৎসল ।
উত্তিষ্ঠ করুণাসিন্ধো সন্ধ্যাকালঃ প্রবর্ততে ॥ ২॥

উত্তিষ্ঠোত্তিষ্ঠ গৌরীশ উত্তিষ্ঠ বৃষভ-ধ্বজ ।
উত্তিষ্ঠ পার্বতী-নাথ ত্রৈলোক্যং মঙ্গলং কুরু ॥ ৩॥

মাতঃ পুরারি-হৃদযাংবুজ-নিত্যবাসে ভক্ত্যা মুরারি-মুখপূজিত-পাদযুগ্মে ।
শ্রীশংকরাশ্রিত-জনেষু দযার্দ্র-চিত্তে শ্রীরামনাথ-দযিতে তব সুপ্রভাতম্ ॥ ৪॥

তব সুপ্রভাতমমরেন্দ্র-বন্দিতে নিজ-দীন-ভক্ত-বরদান-শোভিতে ।
হর্-ইধাতৃ-দেবরমণীভিরর্চিতে হ্যব রামনাথ-দযিতে দযাযুতে ॥ ৫॥

রামাদি-ভক্তনিচযাস্ত্বদুপাসনায গংগাদি-পুণ্যসরিদাহৃত-দিব্যপুষ্পৈঃ ।
আগত্য পাদযুগলার্চন-জাগরূকাঃ শ্রীগন্ধমাদনবিভো তব সুপ্রভাতম্ ॥ ৬॥

বীণা-মৃদঙ্গ-পরিমণ্ডিত-নারদাদ্যৈঃ সংগীযমান-চরিতামৃত পুণ্যদেহ ।

চূডামণীকৃত-মনোহর-চন্দ্রবিংব শ্রীগন্ধমাদনবিভো তব সুপ্রভাতম্ ॥ ৭॥

রামেশ্বরেতি প্রথিতে প্রদেশে রামং পুরস্কৃত্য শিবং স্তুবন্তি ।

ঐক্যং প্রদিষ্টং শিবরামযোশ্চ বিষ্ণ্বীশমূর্তে তব সুপ্রভাতম্ ॥ ৮॥

ব্রহ্মেন্দ্র-বিষ্ণু-গুহ-বাকপতি-সোমসূর্যাঃ মৃত্যুঞ্জযাদি-চরিতং বহুধা স্তুবন্তি ।

বাচস্পতির্বদতি বাসরশুদ্ধিমারাত্ শ্রীগন্ধমাদনবিভো তব সুপ্রভাতম্ ॥ ৯॥

দুষ্পণ্যজাত-শিশুমারণবারকং চ যৎপাবকাখ্যমতিপাবনমগ্নিতীর্থম্ ।

আবাতি মন্দমনিলস্সহ তস্য তোযৈঃ শ্রীগন্ধমাদনবিভো তব সুপ্রভাতম্ ॥ ১০॥

শ্রীরামমন্ত্র-জপপাবন-চিত্তবৃত্তিঃ আপাদবক্ত্রমনুলেপিত-রক্তবর্ণঃ ।

শ্রীমারুতির্জযতি মন্দির-পূর্বভাগে শ্রীগন্ধমাদনবিভো তব সুপ্রভাতম্ ॥ ১১॥

সীতাপহর্তৃ-দশকণ্ঠ-বিমর্দনায দেবাংশভূত-হরিযূথ-সহাযকেন ।

রামেণ বদ্ধ-বরসেতুতল-প্রসন্ন শ্রীগন্ধমাদনবিভো তব সুপ্রভাতম্ ॥ ১২॥

ব্রহ্মঘ্ন-পাপ-পরিহারবিধৌ যতেন রামেণ পূজিত-পবিত্র-পদাব্জ-যুগ্ম ।

ভক্তার্তি-ভঞ্জন নিরঞ্জন রামনাথ শ্রীগন্ধমাদনবিভো তব সুপ্রভাতম্ ॥ ১৩॥

শৈলাধিরাজ-তনযাঞ্চিঅত-বামভাগ কৈলাসবাস করুণামৃত-পূর্ণ-নেত্র ।

গংগাধর ত্রিনযনাঙ্কিত চন্দ্রচূড শ্রীগন্ধমাদনবিভো তব সুপ্রভাতম্ ॥ ১৪॥

নিত্যাভিষেচন-বিধৌ তব গাঙ্গ-তোযং যেন প্রদিষ্টমিহ রাবণ-ঘাতকেন ।
তৎকোটি-তীর্থ-মহিমাবৃত-সন্নিধান শ্রীগন্ধমাদনবিভো তব সুপ্রভাতম্ ॥ ১৫॥

শেষেণ বাযুকৃত-বিক্রম-বাদ-যুদ্ধে বাতেন ভেদিতমভূত্ কিল পর্বতাগ্রম্ ।
তদ্গন্ধমাদন-গিরৌ কৃত-সন্নিধানং শ্রীগন্ধমাদনবিভো তব সুপ্রভাতম্ ॥ ১৬॥

গঙ্গানদী-তট-বরাল-পুণ্যভূমৌ ব্রহ্মাদি-দেব-নিকরৈঃ স্তুত-বিশ্বনাথঃ ।
ত্বদ্বামভাগ-পরিকল্পিত-মন্দিরস্থঃ শ্রীগন্ধমাদনবিভো তব সুপ্রভাতম্ ॥ ১৭॥

পূর্ণেন্দু-বিংব-বদনস্সরসীরুহাক্ষঃ কোদণ্ড-মণ্ডিত-করঃ করুণা-সমুদ্রঃ ।
সীতাপতির্জযতি সুন্দর তে সমক্ষং শ্রীরামনাথ শিব ভো তব সুপ্রভাতম্ ॥ ১৮॥

নন্দীশ্বরেণ গজবক্ত্র-ষডাননাদ্যৈঃ দেবৈরনন্ত-বরদৈশ্চ নবগ্রহাদ্যৈঃ ।
ভক্ত্যা সমর্চিত-নিজাম্বুজ-পাদ-যুগ্ম শ্রীরামনাথ শিব ভো তব সুপ্রভাতম্ ॥ ১৯॥

পদ্মালযাপতি-বিধীন্দ্র-কিরীট-রত্নৈঃ নীরাজিতাঙ্ঘ্রি-যুগলা গিরিরাজ-পুত্রী ।
ত্বদ্দক্ষিণালযবরে কৃত-সন্নিধানা শ্রীরামনাথ শিব ভো তব সুপ্রভাতম্ ॥ ২০॥

লক্ষ্মীসরঃ-প্রভৃতি পাপ-হরাণি সন্তি তীর্থানি পুণ্য-ফলদানি তবালযান্তে ।
তত্তীর্থ-দিব্য-মহিমাবৃত-পুণ্য-দেশ শ্রীরামনাথ শিব ভো তব সুপ্রভাতম্ ॥ ২১॥

শ্রীরামলিঙ্গ করুণামৃত-পূর্ণ-নেত্র শ্রীভূমিনাথ-পরিসেবিত-দিব্যগাত্র ।

শ্রীপার্বতীশ ভবতাপ-বিনাশ-দক্ষ শ্রীরামনাথ শিব ভো তব সুপ্রভাতম্ ॥ ২২॥

জ্যোতিঃ-স্বরূপ তব দিব্য-পদাম্বুজে মে নির্ব্যাজ-ভক্তিমিহ দেহি কৃপাম্বুরাশে ।

মাং পাহি দেব শরণাগত-পারিজাত শ্রীরামনাথ শিব ভো তব সুপ্রভাতম্ ॥ ২৩॥

॥ ইতি শ্রীরামনাথ সুপ্রভাতম্ ॥

Encoded and proofread by N.Balasubramanian bbalu@satyam.net.in

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Ramanatha Suprabhatam Lyrics in Bengali PDF
% File name : rAmanAthasuprabhAtam.itx
% Category : suprabhAta
% Location : doc_shiva
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalu at satyam.net.in
% Proofread by : N.Balasubramanian bbalu at satyam.net.in
% Latest update : January 3, 2009
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built

the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website